AS - 2188

CSL

THE BOWER MANUSCRIPT

*Plate I.*

# The Bower Manuscript.

## Part I.—Leaf I.

*Reverse.*

1. ७ ओं देवर्षिसिद्धगणकिन्नरनागयक्षविद्याधराध्युषितसानुरनन्तरत्नः पुष्पस्त्रिपिष्टपतलोद्धृतदेवरम्यः □□□□□□□□□□□□□
2. ⌒ तुदग्रः ॥ यत्र स्फुटत्मणिसहस्रमयूखजालविद्योभितं दशसु दिक्षु भयात्र लीनम् चन्द्रोडुसूर्यहुतभुङ्लियाभिशंकि प्रद्व□
3. ⌒ शास्त्रपि पुनर्न्न तमो भ्युपैति ॥ यः सेव्यते मुनिगणैरनिशं सशिष्यै र्न्नैकैः समित्कुशफलोदकपुष्पहस्तैः स्वर्गाङ्गनाभिर पि च प्रविसृष्टशाखाः
4. कुंजेषु यस्य तरवः कुसुमार्थिनीभिः ॥ यत्र त्रिलोचनजटामुकुटैकदेशनित्यस्थितोडुपतिदीधितिसंप्रयोगात् शीतन्दिवापि हिमवत्स्फटिकोपलाभमवि
5. न्दुकान्तमणयः प्रचुरं स्रवंति ॥ यस्याब्दमुक्त जलधौतशिलातलेषु कुंजेषु नैकविधवीगणनादितेषु रम्येषु पुष्पफलदद्रुमसंक
6. टेषु रात्रौ हुताशनवदोषधयो ज्वलं न्ति ॥ चन्द्रांशुगौरतरकेसरभारभृद्भिर्मत्तेभमस्तकतटक्षतजोत्थितां शैः सिंहैः शिलोच्चयगुहावदना
7. ट्टहासैर्न्न चम्यते स्युधरबन्दरवो पि यत्र ॥ तस्मिन्गिराववनिमण्डलमण्डभूते सर्व्वातिथाविव जगद्विभवप्रदानैः सर्व्वर्तुपुष्पफलवद्द्रुमरम्य
8. सानावेते विधूततमसो मुनयो वसंति ॥ आत्रेयहारितपराशरभेलगर्ग्गशांबव्यसुश्रुतवसिष्ठकरालकाप्याः सर्व्वौषधीरसगणाकृतिवीर्यनाम
9. जिज्ञासवः समुदिताः शतशः प्रचेरुः ॥ दृष्ट्वा पत्रैर्हरितहरितैरिन्द्रनील प्रकाशैः कन्दैः कुन्दस्फटिककुमुदेन्दुशंखाभ्रशुभ्रैः उत्पन्नाश्चो
10. मनिसुपगतः सुश्रुतः काशिराजं किन्वेतत्स्यादथ स भग वानाह तस्मै यथावत् ॥ पुरासृतं प्रमथितमसुरेन्द्रः स्वयं प पौ तस्य चिच्छेद भ गवानु
11. ⌒ त्तमांगं जना र्दनः ॥ कण्ठनाडी समासन्ना विच्छिन्ने तस्य मूर्धनि विन्दवः पतिता भू मावाद्यं तस्येह जन्म तु ॥

# The Bower Manuscript.

Part I, Leaf 1. Plate I.

Obverse.



Reverse.



Photo-etching. ORIGINAL SIZE. Survey of India Offices, Calcutta, November 1892.

# The Bower Manuscript.

*Plate II.*

## Part I.—Leaf 2.

*Obverse.*

1. न भक्षयत्येनमतश्च विप्राः शरीरसंपर्कविनिःसृतत्वात् गन्धोग्रतामप्यत एव चास्य वदंति शास्त्राधिगमप्रवीणाः ॥ लवणरस[वियोगादा]हुरेन रशूनम्
2. लशुन इ ति तु संज्ञा चास्य लोकप्रतीता बहुभिरिह किमु म्लेच्छभाषाभिधानैः शृणु रसगुणवीर्याण्यस्य चैवोपयोगात् ॥ रसे च पाके च कटुः प्र
3. दिष्टः पाके तथा स्वा दुरुदाहृतो न्यः लघुश्च गन्धेन स दुर्ज्जरश्च वीर्येण चोष्णः प्रथितश्च वृष्यः ॥ शांभ्रोष्णस्नेहभावात्पवनबलहरः
4. प्रोक्तो मुनिव्रषैः माधुर्यात्पित्तभावाद पि च स रसतया पित्तप्रशमन, औष्ण्यात्तैक्ष्ण्यात्कटुत्वात्कफबलविजयी विद्वद्भिरुदितः सर्वान्रोगान्निहन्यादिति
5. विधिविहितो दोषत्रयहरः ॥ पवनं विनिहं त्यपि चा स्थिगतं कफमप्यचिरादुदितं शमयेत् जनयेदपि चाग्नि ब लं प्रबलं बलवर्णकरः प्रव
6. रश्च मतः ॥ अथ बहुविधमद्यमांस सर्पिर्यवगोधूमभुजां सुखात्मकानाम् अयमिह लशुनोत्सवः प्रयोज्यो हिमकाले च मधौ च माध
7. वे च ॥ त्यज्यंति कामिनीभिर्जघनसमुचिता यत्र काञ्चीकलापाः हाराः शैत्याच्च वक्षस्तन तटयुगला पीडनात्संप्रयांति कांता नेन्दुजालव्यतिकरसुभगा हर्म्य
8. पृष्ठोपभोगाः काले तस्मिन्प्रयो ज्यो ह्यगुरु बहुमतं कुंकुमांकाश्च यत्र ॥ हर्म्याग्रेष्वथ तोरणेषु वलभीद्वारेषु चाविष्कृताः कन्दाख्या लशुनस्रजो विरचयेद्भूमौ
9. [त]थैवार्च्चनम् मालास्तत्परिचारकस्य च जनस्यारोपयेत्तन्मयीरित्यस्यैष विधिर्ज्जनस्य वि हितः स्वल्पोवमा नामतः ॥ अथ शुद्धतनुः शुचिर्व्विविक्तः
10. [सुरवि]प्रान्प्रतिपूज्य पावकं च लशुनात्स्वरसं पटांतपूतं प्रपिबेद क्षि शुभग्रहर्क्षयुक्ते ॥ कुडवं कुडवा दयापि चा र्धं कुडवं सार्धमतो पि वाति□□

*Reverse.*

1. नियता न हि काचिदत्र मात्रा प्रपिबेद्दोषबलामयानि दृष्ट ॥ सतालवृ□व्यजनानिलैः शुभः पवन्तमन समभस्त्रशच्छनैः
2. भवेत्तु मूर्च्छा पिबतो पि वा यदि स्पृशेत्ततः शीतजलैः सचन्दनैः ॥ सुरातृतीयांशविमूर्च्छितस्य गण्डूषमेकं प्रपिबेद्रसस्य पूर्व्वं गलक्रोडवि□□
3. हेतोः स्थित्वा मुहूर्त्तञ्च पिबेत्सशेषम् ॥ तस्मिञ्जीर्ण्णे चोरशाल्यान्नभुक्तात् चीरायोज्या जांगलानां रसैर्व्वा ह्रद्यैर्यूषैः संस्कृतैर्व्वैदलैर्व्वा युक्तः स्नेहैर्माचयैकं च
4. कालम् ॥ पिबेन्माद्वीकं वा मधु मधुसमांशाच्छमदिराम् अरिष्टं शीधुं वा जगलमगजं मैरेयमपि वा अतो न्यद्वा मद्यं भवति गुणवद्यत्तत्सलिलम् पिबेदेकैकं वा न
5. भवति यथा मद्यव्यतिकरः ॥ अमद्यपः सुखो दकं पिबेत्तथाम्लकांचिकम् तुषोदकं सुवीरजं पिबेच्च मस्तु यच्छुभम् ॥ न गुडेन कथञ्चिदेनमद्यान्न तथामच्च जलं पिबे
6. त्प्रयुजन् सततश्च भवेदजीर्णशंकी न च खादेदबहूनि वासराणि ॥ अथ कन्दाञ्छुभाञ्छुत्वान्पिष्टान्सर्पिश्च तत्समम् खजेनाभिप्रमथ्यैतदेकध्यं घृतभाजने ॥
7. व्युष्टं दशाहात्प्रभृति भक्षयेद्दिवसं मितम् जोर्णे च रसकल्पोक्तमाहारविधि माचरेत् द्वावप्येताबभिहितौ कल्पौ प्राग्रहरौ मया अनयोर्यत्नवा
8. ञ्चास्यात्कल्पानन्यांश्छृणुष्व मे ॥ कन्दाञ्छ्क्ष्णभानपक्वतमलान्सतुक्तुल्माससुक्तैः सर्पिस्तैलाभ्यां समितविकृतैः सूपमांसप्रकारैः मौद्गैश्चर्वैर्हरितकयु
9. तैर्गन्धसौवर्च्च लाद्यैरद्यात्संस्कारैर्बहुभि रपरैः साधितान्वेतराणि ॥ मांसैः सार्धं साधयित्वास्य काण्डं पूतं ह्रद्यं तं रसं पाययीत सिद्धं तद्वल्क्षीरमस्मै
10. प्रद द्याद्यूषं वा खादेदलं तद्विमिश्रम् ॥ अथ तैलशुक्तसहितं लशुनं निहितं यवेषु परिलिप्य हृदा स्थितमेकमब्दमुपयुज्य नरः स □□ि□□
11. नपि जहाति गदान् ॥ त्रिरात्रमुषिता तु गौरनतृणा यदा स्यात्तदा तृणार्धमुपकल्पयेत्तश□□□□□□□□

# The Bower Manuscript.

Part I. Leaf 2. | Plate II.

## Obverse.



## Reverse.



ORIGINAL SIZE.

Photo-etching.

Survey of India Offices, Calcutta, December 1892.

# The Bower Manuscript.

Part I.—Leaf 3. **Plate III**

*Obverse.*

1. □□दधिघृतानि तक्रमथवापि तद्वाद्मण: प्रयुज्य विविधाम्गदानभिविजित्य स्पर्शो भवेत् ॥ प्रस्थान्द्वात्रिंशल्लशुनरसत:
2. किस्वमर्धार्धमस्मात् तैलप्रस्थो व्यपगतमल: पिष्टत: षट्ट देया: द धान्निकाथा दपिच कलशं भिषग्भ्या:
3. सुशीतं प्रस्थौ च द्वौ पुनरभिहरेत्तत्र पिष्टस्य धीमान् इति सुरेयं पंच पश्चाद्दद्रस वर्ण गन्ध: समन्विता
4. भवति तैलं नामतश्चेदसुन्दरीमत्यर्थकामुकम् तैलमे तथ: सुराम पि वा पुरु ष: प्रयुजीत यत्न त:
5. परिहरति तं गदानीकान्याजो क्षतास्थानवंतरे ॥ प्रस्थं पिष्टा शोधित मेकं लशु नानाम् युंज्याच्चूर्णसे फलैरर्धं
6. पालकै: सर्पिस्तैलाभ्यां कुडवशेति दशाहम् व्युष्ट कास श्वा सावडं विघ्नमुश न्ति ॥ हन्याद्युक्तो मारुतगु ल्मं पवनघ्नै:
7. कुष्ठं हन्याद्योजितमात्रं खदिरेण काश्येयस्तो हय गन्धाव्यांत मिश्र: क्षये: प्रोक्तश्चैष विमि यो मधुयष्ट्या ॥ नानाविधानेष निहंति रोगान्
8. नानाविधद्रव्यविशेषयुक्त: न यंत्रणा कुत्रचिदस्ति कल्पे यथा प्रयुक्त: सु खिभि: स कल्प: ॥ रसायनवरस्यास्य प्रयुक्तस्य
9. गुणानि मत् समासत: प्रोच्यमानान्सुश्रुतं श्रमना: शृणु ॥ कुष्ठाराचकगुल्मकासक्षशताग्निर्चाग्निसादप्रणुत् वातासृग्दरशूलशोषजठरप्लीहोदरार्शोहर:
10. पचाघातकाटग्रहाक्रामगदोदावर्त्तमहापह: तन्द्रापानसवा हृपृष्ठपवनाप स्मारसंसूदन: ॥ श्रीमान्वेणुमृदंगवल्गुनिनदस्तप्ताग्रहेमद्युतिर्मेधाधीबलवान्
11. सुसंहततनुर्वल्यादाभिर्वर्जित: नित्या त्वाहसुर्वाधाभ: समुद तै: सर्वैर्हर्ढैरिन्द्रियै: जीवेदब्दशतं दृढानलबल: स्त्रीष्वचयो वा □मा□

*Reverse.*

1. □□□□लशुनाना कल्प उक्तो मयायम् मुनिरपि च दृष्ट: प्राक्तनैरेवमेव प□□□□□□□□□□प्रयुक्ता च सम्यग□□□□□□□□ □□□□□□□□□
2. आहारपुष्टधातूनां साम्यमारोग्यमेव च पुष्टस्ते जस्तथोत्साहमायुश्चैवाग्निसंभवा: अग्निराहारमूलस्तु पक्तिमूलाश्च धातव: धातुसाम्यात्तथारोग्यमारोग्यपुष्टृ
3. त्तमा पुष्ट्या तेजस्तथोत्साह:सर्वैरतश्चजीवितम् प्राणिनांवर्द्धतेतस्मादाग्निमादोपरोचयेत् धातुसाम्यात्समःप्रोक्त:स वै श्रेष्ठ:प्रकीर्त्तित:~विषमेदाधिकंसर्पि:पिवेद्धा ह्युषादिक
4. स्निग्धोष्णा वर्त्तयश्चेष्टास्तथा पानाशनानि चमन्दतु लंघनं पूर्वं पश्चात्पाचनदीपनम् चूर्णारिष्टप्रयोगाश्च हिता:पित्तकफापहा: यथासात्म्यं प्रयोक्तव्यं समे ग्नौ भिषजामितिॱभव
5. २ ति चात्र ॱ मन्दे तीक्ष्णे च सृयते विनोपकरणैर्नर: विषमे रोगबाहु ल्यं समे जावे च्चिरं सुखी तस्माद्रोगेषु सर्व्वेषु सर्वकालेषु बुद्धिमान् अग्निमूला क्रिया
6. कार्या पश्चादामयशांतये ॥ स्वरसेन शंखपुष्प्या ब्राह्मी मण्डूकपर्ण्यिमधुकानामिमेधारोग्यबलार्थो जी वितुकाम:प्रयुजीत मासिनतुमेधावी षण्मासाच्छ्रुतधरो भवत्य
7. २ जर: जीवति वर्षसहस्रं समा प्रयोगाच्छतद यं विधिवत् एवं परत: परत: प्रयुंजमानो भवत्यजर: ॥ ●●●● ॥ ◎
8. यवागूखडयूषेषु लेह्यचूर्णागदेषु च गुडिकांज नवर्त्यासुधूमप्रठमनेषु च पुटपाकतर्पे पर्खेदेनावमनाश्योत नेषु च
9. अन्येषु चाप्यनुक्तेषु यत्र भागो न कीर्त्तित: द्रव्याणां समभाग: स्याद्द्गुणे मधुसर्पिषो त्रिगुणं तु गुडं दद्यात्सिताचूर्णं चतुर्गुणम् पेयेषु य
10. त्र नोदिष्टं द्रवन्तत्र जलं मतम् दधिमूत्रपय:सर्प्पिरोसृग्शकृषु च गव्यं प्रकल्पयेत्सर्व्वं मधूनां माक्षिकोद्भवम् ॥ दाडिमत्वचया
11. सार्धं कटुतैलं विपाचयेत् कर्षाँ भगोष्ठो लिंगश्च सर्व्वं एतेन वर्धते ॥ चित्रकार्धं पलं मूलाच्चिह्नल्लातलयोस्तथा
12. □□□ दन्तिमूलानां कर्षं कर्षं पृथक्पृथक् पिप्पल्या: सैन्धवाच्चैव तथा हिंगुं बृवेतसात् विंशतिश्चाभया मुख्या

# The Bower Manuscript.

Part I. Leaf 3. Plate III.

## Obverse.



## Reverse.



ORIGINAL SIZE.

Photo-etching.

Survey of India Offices, Calcutta, December 1892.

# The Bower Manuscript.

## Part I.—Leaf 4.

*Plate IV.*

*Obverse.*

1. □□□□[वि]प[ा]चयेत् गुडस्याष्टपलान्सम्यक्कुर्व्वीत दशमोदकान् एकेकं भक्षयेत्तस्मादृशमे दशमे हनि दोषाणां पाचना र्थाय जलमुष्णं पिवेदनु विरिक्तांतेतत: स्नात्वा सात्म्य
2. □□ प्रयोजयेत् नात्र कश्चित्परीहारो वाक्कायमनसां सदा सर्व्वर्तुको नरेन्द्राणां विरेको गस्तिनिर्म्मित: जरामृत्युप्रमथन: सर्व्वामयविनाशन: वृष्यो रसायनश्चैव
3. मेधारोग्याभिवर्धन: नापुत्रायप्रदातव्यो नाशिष्यायकथश्चन राजद्विष्टे न दातव्यो येचान्येपापचारि ण: ॥ द्वेपं चमूलि मधुकंगुडूचोरास्नाश्वगन्धामरदारुपाठात्वचं व
4. लिद्वतगरन्तिलाश्च मूर्व्वांकुलत्थान्नलदं घनश्च पुनर्न्नवां वेणुफलत्वचं च जोवंत्य थैलागुरुजीवकाश्च एर ण्ड मूलंसफलप्ररोहंकुरण्डपुष्पाणि
5. महौषधं च द्वाभ्यां त्रिभिर्वा क्वथितं सतोयमाजं प यो गव्यमथाविकं वा ससैन्धवं किंचिद त: सु खोष्णमाश्च्योतनं वातकृते त्त्विरोगे ॥ दार्व्व्युत्पलं प
6. द्मक तुंग याषा मेदा मृणालं मधुकं समंगा कालीयकं पर्प्पटका लताचद्राक्षायकार्श्मर्यपरूषकंचमूलानिगुन्द्रान डवेतसानांशुंगानिचापुष्प वतांतृणा
7. नाम् प्रपौण्डरीकं सकिराततिक्तं भद्रश्रियं निम्ब पटोलवाशाम् द्वौ त्रीणि वाजे पयसि स्त्रिया वा श्रितान्यथाश्च्योतनमुत्तमं स्यात् सशर्क्करं माक्षिकसंप्रयुक्तं पैले त्त्वि
8. रोगे रुधिरात्मके च ॥ त्रीण्यूषणानि त्रिफला हरिद्र कासीस जातीग्रहधूमजात्य: लाक्षाथ दं ती सुरसो वचा च पाठाश्वगन्धामरदारु चाद्यम् सकट्फलैलागुरुकण्ट
9. कारी रोध्रं करञ्जं बृहतीं श्वदंष्ट्राम् द्वे त्रीणि वात: सलिले श्रितानि कोष्णानि कार्य्याणि ससैन्धवानि आश्च्योतनं श्लेष्मकृते त्त्विरोगे मधुप्रगाढं प्रवदंति संत: परूष□ाम्र
10. तकतिन्तिडोकवृक्षाम्लजंब्वाम्रकपित्थकोलै: समातुलुंगैरथ दाडिमाम्लैर्म्मद्यै: पयोभिर्द्दधिमस्तुना वा दार्व्व्युत्पलाद्यै: क्वथि तैश्च साम्लैराश्च्योतनं सैन्धव सं□□□
11. □त्यासशीतोष्णकृ तं निहंति रक्ता लि कां नेत्ररुजं प्रसह्य संस र्गजे सर्व्वसमुत्थिते वा हीनाधिकत्वं प्रसमीक्ष्यरोगे कु र्व्वी त □□□□□□□□

*Reverse.*

1. □पहरी विविक्त: ॥ एरण्डमूलं सफलप्ररोहं विजर्जरं क्षीरयुतं लजानाम् स्याद्वातरक्तापहमेतदग्र्यमाश्च्योतन□□षजो वदत ॥ प्रपौण्डर कमधुकहरिद्राञ्च□□□□□□□□□
2. आश्च्योतनंशर्क्करयाविमिश्रंपित्तानिलार्त्तिंविनिवर्त्तयेत ॥ नतंश्वदंष्ट्रावृहतीत्वचञ्चह्रीवेरमित्येषश्रृतस्त्वजानाम् क्षीरोदकै: सैन्धवसंप्रयुक्तमाश्च्योतनं वातकफापहंस्यात् □□□
3. दार्व्वीमधुकंचमुस्त्यंगव्येपयस्यात्क्वथित:स्त्रियावा आश्च्योतनोमारुतरक्तपित्तेसशर्क्कर:सद्भिषजा विधेय:॥चूर्ण्णानिसूक्ष्माणिफलत्रयस्यबध्वासिते क्षौमपटैकदेशेआजे□□ध
4. गनया जले वा परिप्लुतं सर्व्वरुजापहं स्यात् ॥ दार्व्वीं हरिद्रां त्रिफलां समुस्तां सशर्क्करं माक्षिकसंप्रयुक्ताम् आश्च्योतनं मानुषदुग्धयुक्तं पित्तास्रवातापहमग्र्यमुक्तम् ॥ एरण्डमूलैस्त
5. पू रुणै: सपत्रै: कल्कैरथो षष्टिकतण्डुलानाम् घृताप्लुतं शावकरप्रलिप्तं पूर्व्वेण कल्पेन रुजापहं स्यात् ॥ स्वेदपुटपाकनावनतर्पणघृतपानलेपपरिषेकान् आश्च्योतन
6. निर्द्दिष्टैर्द्रव्यैरेतै: प्रकल्पयीत भिषक् ॥ ऋतु व्याधिहिताभीलुर्व्यंगनीलीकनाशनान् विषशोथापहांश्चैव मुखलेपान्प्रचक्षते ॥ त्वक्क्षीरिणांचन्दनपद्मकौचगु न्द्रांह
7. णालं घनवालकौ च मूलं कुशानां तगरैलवा लुता लीसपत्रंनलदंतिलाश्च मसूरदूर्व्वामयवंमृणालंरसश्चयष्टीमधु कोत्पलानाम् शैलेयमुस्तागुरु
8. श्यामकस्थौनेयकैलातगरंतिलाश्चत्वक्पत्त्रकुष्ठागुरुश्यामकञ्च मांसीं ह रेणुं परिपेल व च्च य ष्टि ह्व रोध्रागुरुचन्दनञ्चपुनर्न्नवाकृष्णतिलालताच इत्यर्ध
9. रूपैर्व्वदनप्रलेपै: कालेषु घर्मादिषु संप्रयोज्य: ॥ निदर्शिता दृष्टिहिता नराणां दोषापहाश्च शृणु चोच्य मानान् वातामयघ्नाजलदागमोक्ता:पित्त
10. मयघ्ना: शरदि प्रदिष्टा: ग्रीष्मोपदिष्टा रुधिरामयघ्ना: कफामयघ्ना: कुसुमागमोक्ता: कर्प्पास मूला न्यलतामुशो रकालीयका क्षीरवतां त्वचश्च भद्रश्रि
11. □□□□कं यवाश्च वदंति वर्ण्यान्वदनप्रलेपान् एतानि मूत्रेण गवां प्रशोष्य कोलाम्लमूत्रै: सह मिश्रिता वा स्युर्म्मा तुलुंगस्य रसे युता वा ससर्षपा: शोष्य

CSL

# The Bower Manuscript.

Part I. Leaf 4. Plate IV.

## Obverse.



## Reverse.



ORIGINAL SIZE.

Photo-etching.

Survey of India Offices. Calcutta. December 1892.

# THE BOWER MANUSCRIPT.

**Part I.—Leaf 5.** *Plate V.*

*Obverse.*

1. □□□□□□□□□□□□□□ कासु क्लष्ट च दुष्ट रुधिरे च मुक्त स्त्र□ वरेके विविधे च नास्ये क्तता विधेया वदनप्र लेपाः त्वक्कुष्ठमांसोनतचन्दनं च मनःशिला व्याघ्र
2. □□□□□म् □बृक कुष्ठ सुरसे हरिद्रे विषापहाः स्युर्वदनप्रलेपाः ॥ मूर्व्वाश्वगन्धा त्रिफला करञ्जं शोथापहः स्युर्वदनप्रलेपाः ॥ मूर्व्वापि गोमूत्रयुतां वदंति शोथापहं
3. □□दनप्रलेपम् ॥ सुखेप्रलिप्तेनहसेन्नरुद्यात्स्वप्नं न सेवेततथानचाद्यात् नाग्नौप्रतप्येन्नच धारयेत शु ष्कं प्रलि प्तंवदनेमनुष्यः अभीलुनोलीकमथापि
4. कुष्ठं व्यंगं सपिल्वं तिलकांश्च जन्तोः शाम्यंति सद्यो वदनप्रलेपाद्दृष्टिश्च वक्त्रञ्च भवेत्प्रसन्नम् ॥ मुखे प्रलि प्ते हसतो ग्रतो वा श्लेष्मा सवायुः
5. स्वपतः प्रकोपः यात्याशु तस्माच्छिरसो विरेकाः स्नेहाश्च धूमाश्च पुनः प्रयोज्याः अग्नि प्रतापा द्विद्रुतश्च जंतोर्धतेच शुष्केवदनप्रलेपे अभीलु
6. पूर्व्वान्प्रवदंति रोगांस्तेषां यथोक्तां विदधीत शान्तिम् नक्ताभ्यतैर्मिर्यशिरोर्त्तिदाहं पित्तात्मिकां चक्षुरुजां सदाहाम् दोषास्तथान्ये पि मुखत्वचस्था. शाम्यन्ति
7. वदनप्रलेपात् अक्ष्णोर्व्विकारे कफमारुताभ्यां नस्तःक्लतेपीनसरोगिणांच हनुग्रहेशीर्षरुजा सुचैववदंतिवर्ज्यान्वदनप्रलेपान् अंगुलस्य चतुर्भागो [सद्यो
8. मुखलेपो विधीयते मध्यमस्तु त्रिभागः स्यादन्त्य□□□□भवेत् यष्टिन्नरोध्रां त्रिफला मृणालं सितोपलां कांचनगैरिकञ्च पद्मलशैलागुरुदेवदारुपुनर्न्नवाव्याघ्रनखां
9. जनञ्च मनःशिलालं द्वहतीत्वचञ्च मांसोहरि□ □□पेलवं च सौवीरकं गैरिककटुलञ्च स्याच्छारिवा शर्करया विमिश्रा इत्यर्धरूपैश्चतुरः प्रदिष्टाः कफासपि□□□□
10. रोगशान्तौ विडालकैस्तैर्न्नयनं समन्तादापक्ष्ममूलाद्यदिहेद्वहिर्व्वा रोध्रञ्च किंचित्तु घृतेन दिग्धमयोविघृष्टामभयामथोवा त्वचं बृहत्याः सममञ्जन□□□
11. लकः सर्वरुजापहः स्यात् गैरिकरसांजनांजनमनःशिलारीति कुसुमसमभागाः ईषन्मरिचसहो याद्विगुणं □□□□□□□□□□

*Reverse.*

1. मरिचकुसुमे च हरितं विपचेन्मृदग्निना घृतसहीयम् अंजनविडालको यश्चतुर्व्ववच्याम□□□ □□□□□□□□□गात्तखल□□□□□□□□□□□□
2. प्रोच्यमानं निबोधत रसदोशाद्य वायाश्च पित्तशोणितदूषणात् भवत्यकालपलितं ह्रस्वस्य जरसा भवेत् प्रायेण श्लेष्मला नार्याश्छाया शस्य□□□□□□□□□
3. निषेविणो रजो दुष्टं सृजंति च प्रसन्नरक्तपित्तोष्मा केशभूमिरतः स्त्रियाः न च्यवंति ततः केशास्तस्मादखलिताः स्त्रियः पुंसामतो विपर्यासे रक्तपित्तं प्रदुष्य□□□□
4. केशमलानि खलतिं कुरुते शिरः ॥ निष्केशं ताम्रवालञ्च खालित्यं यच्चिरोस्थितम् न तत्सिद्ध्यति साध्यन्तु नवं सम्यगुपाचरेत् खालित्यपलिते पूर्व्वं बहुशो वेधयेत्सिराः
5. ॡ दुष्टशोणितशुद्धस्य वमनादिक्रिया हिता यथो□□□□ पश्चाच्छुद्धकोष्ठः प्रयोजयेत् तैलयोगांश्च विविधान्केशरागांस्तथैव च केशसंजननांश्चैव तथा संवर्द्धनानि च
6. प्रक्षालनाश्च केशानां यथा दोषहरा हिताः ॥ ⊙ ॥ स्वादम्लुलवणोपेतैर्घृतैर्मारुतकासिनम् साधैरुपाचरेद्वीमान्क्षेवलैर्व्वा यथाबलम् ग्राम्यानूपोदकरसैः सगुडैः सप
7. लाण्डुभिः अम्बुस्निग्धोष्णमधुरैर्भोज्या गोधूमशा लयः सुरां समण्डां घर्माम्बु रसान्वापि प्रकामतः वा तकासे बहु स्नेहं सगुडं वा पयः पिबेत् शृंगवेरषडोद्रा
8. क्षाशृं गोपिप्पलिभार्ग्गिभिः गुडतैलयुतो लेह्यो हितो मारुतकासिनाम् पिप्पलीमारुताजाजीषडीपुष्करचित्रकैः ससैन्धवमिदं चूर्णं हितं मारुतकासिनाम्
9. पलानि क्वाथयेत्रिंशत्कण्टकार्या जलाढके चतुर्भागस्थिते पूते दद्याद्गुडपलान्यगे चूर्णैर्न्नागरभार्ग्येला पिप्पलीषडिचित्रकैः घृततैलपलैश्चापि
10. संयतं लिहवत्पचेत् चतुर्भिरा घनीभावाच्छीते च द्विपलं मधु पिप्पलीपलचूर्णं च दत्वा लिह्यात्तु कासनुत् ॥ दशमूलकषायेण भार्ग्गीकल्कं घृतं पचेत्
11. □□□□□□□□□□□□ वातकासनुत् कण्टकार्या रसप्रस्थे घृतस्य कुडवं पचेत् पुनर्न्नवायाः कल्केन तत्परं वातकासनुत् भार्ग्गीकल्कांवृतंचाथपचेद्दध्निचतुर्गुणे
12. वाचीरसे द्विगुणितं वातकासहरं परम् पैत्तिके सर्प्पिषः पानं हितं स्यात्सविरेचनम्

CSL

# The Bower Manuscript.

Part I. Leaf 5.

Plate V.

Obverse.



Reverse.



ORIGINAL SIZE.

Photo-etching.

Survey of India Offices, Calcutta, December 1892.

Ministry of Culture · Government of India
CSL

# The Bower Manuscript.

Plate VI.

## Part II.—Leaf I.

*Obverse.*

1. □मस्तथागतेभ्यः प्राक्प्रणीतैर्म्महर्षीणांयोगमुख्यैस्समन्वितम् वक्ष्येहं सिद्धसंकल्पनाम्नावैनावनीतकम् ॥ नानाव्याधिपरीतानां नृणां स्त्रीणाञ्चयद्धितम्
2. कुमाराणांहितंयच्चतत्सर्व्वमिहवक्ष्यते ॥ समासरतबुद्धीनांभिषजां प्रीतिवर्द्धनम् योगवाहुल्यतश्चापिविस्तरन्नं मनोनुगम् ॥ अध्यायंचूर्णयोगा नांप्रथमंचात्र
3. ~ वक्ष्यते द्वितीयंघ्रतपानानांतृतीयं तैलसंज्ञितम् चतुर्थमिश्रकंनामनानाव्याधिचिकित्सितम् पञ्चमंवस्तियो गानांरसाय न विधानतः~
4. सप्तमंचयवागूनांह्यष्टमसुच्यते नेत्रां जना नां नवमंदशमंकेशरञ्जनम् अभयाकल्पनामाख्य मत्रैकादशमुच्यते द्वादशंस्याच्छैलजतोश्चित्र
5. कस्यत्रयोदशम् कुमारभृत्यमप्यत्रस्याच्चतुर्दशमिष्यते वन्ध्याचिकित्सिताख्यंचज्ञेयंप ञ्चदशंबुधैः सुभगा चिकित्सिताख्यञ्चतथाषो डशकंमतम् इत्येतेषोड
6. शाद्ध्याया विज्ञेयानावनीतकम् नेदं दद्यादपु त्रायनचा भ्रा त्रेक थञ्चन अशिष्येप्रस्तवोन स्यात्कर्त्तव्यइतिमेमतिः ~॥◎
7. ता लीसपत्रंमरिचंनागरंपिप्पलीतथा यथोत्तरंभा गवृ द्धा स्त्वगेले चार्द्धभागिके पि प्पल्यष्टगुणाचात्रप्रदेया
8. सितशर्क्करा कासश्वासारुचिहरंतच्चूर्णंभक्तरोचनम् हृत्पाण्डुग्रहणीशोषका सप्लीहज्वरापहम् छर्द्य तीसारशु ल्मघ्नंमूढवातानुलोमनमिति ◎ तालीस
9. कंनामचूर्णम् ◎ यवानीं तिन्तिडीकांचनागरं सांम्लवेतसम् दाडिमं वदरञ्चाम्लंकार्षिकान्युपकल्पयेत् धान्यसौव र्चलाजा जीवरांगंचार्द्धकार्षिकाःपिप्प
10. □ली□ शतं त्वेकंद्वेशतेमरिचस्यच शर्क्करायाश्चचत्वारिपलान्येकत्रचूर्णं येत् जिह्वाविशोधनंहृद्यं तच्चूर्णंभक्तरोचनम् हृत्प्ली हपार्श्वशूलघ्नंविवन्धानाहना
11. ~ शनम् कासश्वासहरंग्राहिग्रहण्यर्शोविकारनुदिति ◎ षाडवंनामचूर्णम् ◎ ॥ ◎

*Reverse.*

1. □□□□□□□□कापिप्पलीविश्वभेषजम् मातुलुंगरसक्षौद्रलीढःश्वासनिवर्हणम् ~ लाजा पा ट□□□नश्चांजनंपिप्पलीकणाः शिरीषपुष्पस्व
2. रस□त्रः श्वासहरःपरःमधुकंमरिचंभार्ग्गीमृद्वीकापुष्करागुरु मधुसर्पियु तोलिह्यो हिक्काश्वासनिवारणः ॥ शिखिनाडंवरोःशृंगमश्वस्कन्धघृता
3. प्लुतंदग्धमन्तःपुटेश्वासीलिह्यात्तन्मधुसर्पिषा ~ प्रवाडशंखत्रिफला चूर्णंमधुघ्रताप्लुतम् पिप्पलीगैरिकञ्चैवलेह्यंहिक्कानिवारणम् शण
4. वीजंप्रवाडांश्चगैरिकञ्चैवलेहयेत् हिक्कायांमधुसर्पिभ्यांखरोष्ट्राश्वास्थिभस्म च पिवेदेरण्ड तैलंवा वारुणीमण्डमिश्रितम् हिक्काश्वास
5. निवृत्त्यर्थंस्निग्धःसंशोधनंपिवेदिति ◎

# The Bower Manuscript.

Part II. Leaf 1.

Plate VI.

Obverse.



Reverse.



ORIGINAL SIZE.

Photo-etching.

Survey of India Offices, Calcutta, January 1893.

# The Bower Manuscript.

## Part II.—Leaf 2.

*Plate VII.*

*Obverse.*

1. ◻◻◻◻तुकाकोलीपिप्पलींबहुलांत्वचम् श्रंत्यादूर्ध्वद्विगुणितंलेहयेन्मधुसर्पिषा चूर्णितान्प्राशयेद्दातश्वासकासकफातुदः पार्श्वशूलिनमल्पाग्निंसुतजिह्न
2. म   रोचकिम् ◎ वर्द्धमानकंनामचूर्णम् ◎ षडीपुष्करजीवन्तीचोर   कागुरुनागरैःपिप्पली मुस्तसुरसत्वगेलोदीच्य भागिकैः तामलक्यास्तु चूर्णन्त
3. च्छर्करा ष्टगुणाभवेत् श्वासकासज्वरहरं पार्श्वहृच्छूलनाशनमिति॥ ◎ षड्यादिकं नाम चूर्णम् ◎ हिंगुं त्रिकटु  कं पाठांह  वुषामभयांषडीम् अजमोदा
4. जगन्धेचतिन्तिडीकांम्लवेतसम् दाडिमंपुष्करंधान्यम  जाजींचित्रकंवचाम् द्वौचारौलवणेद्वेचचव्य  चैक  नचूर्णं येत् चूर्णमेतत्प्रयोक्तव्यमन्नपानेष्व
5. नत्ययम् प्राग्भक्तमथवापेयंभक्तेनोष्णोद  केन वा पार्श्वहृ ह  स्तिशू लेषुगुल्मेवात कफोल्वणे ग्रहण्यर्शोविका
6. रेषुप्लीहेपाण्ड्वामयेरुचौ आनाहेमूत्रक  च्छ्रेचयोनीगुद रु जा  सुच उ रोविवन्धेकासेच हिक्काश्वासेगलग्रहे भावितं
7. मातुलुंगस्यचूर्णमेतद्रसेनवाबहुशोगुडिकाःकार्याःकार्षिकास्स्युस्ततोधिकम् ◎ मातुलुंगगुडिकाना म ◎  कटुत्रिकं तिक्तकरो हिणीं यवं चिराततिक्तोथश्र
8. तक्रतोयंवाः समाःस्युरेतेद्विगुणंतुचित्रकाद्दिरष्टभागंःकुटज त्वचंतथा सुसूक्ष्मपिष्टंग्निशिरांबु संयुतं पिवेन्मनुष्योर्द्धपलं गुडान्वितम्  ज्वरंप्रमे
9. हंश्वयथूनरोचकंग्रसद्रजोगुल्ममथापि  पाण्डुताम् अन्येपियेपित्तकफानुब न्धा रोगानरा णांसुभृशा तुराणाम् सर्व्वा  ञ्जयेचूर्णमिदं प्रयुक्तम्
10. चात्रेयजुष्टंलगुडाख्यमग्र्यमिति ॥ ◎ लगुडचू र्णनाम ◎ त्रिफलायास्त्रयोभागा भागा स्त्रिकटुकात्त्रयः चित्रमुस्ताविडंगानांभागाःसुवर्णवचायसात् ◎

*Reverse.*

1. न◻यसमिदंचूर्णपाण्डुश्वयथुरोगनुत् ◎ रास्नांससौवर्चलभद्रमुस्तामगारधूमंकटुकत्रिकंच चारोयवानांयडिचेत्समांशाभागाःसमाचूर्णकृताविधेयाद्दति ◎
2. ◻◻रोगप्रशमनः ◎ रसाञ्जनंदारुहरिद्रिकात्वचन्तथाभवेत्तेजवतीसपिप्पलीसमानिकुर्यात्तुलिता निवुद्धिमा ञ्जलेनपिष्टागुडिकानिधा पयेत् शमेति रक्तं
3. मुखपाकमेवचगलग्रहंकण्ठविडालिकांतथेति ◎ मुखरोगघ्नागुडिका ◎ त्रिफलायास्तुकु डवंपि प्पल्याः  कुडवंतथा विडंगमरिचाभ्या  त्रकुडवेद्वे
4. ऽ समावपेत् पलंपलंच कुर्व्वीतदंतीचित्रकयोरपि ग्रन्थिकात्पिप्पलीमूलात्पलं कुष्ठपल न्तथा शृंगवेरपलेद्वे च••• व्यफलानिच पेथान्यर्धपलीनानियानितानि
5. निबोधत–रास्नांवलांगोक्षुरकंमधुकंदेवदारुच  वचांप्रतिविषां पा ठांसु  स्तांकटु करोहि णीम्कद्कलंशारिवे द्वेचश्यामाभल्लातकानिच पुनर्न्न
6. वांतेजवतीं त्वचंपत्रंच तावरीम् निचुलंत्रि  वृतांभार्गीं कु ट  ज स्यफ लंत्वचम् एतदौ षधसंभारंसूक्ष्मचूर्णंतुकारयेत्
7. यावदेतन्नवेचूर्णंहि  स्तावत्स्यादयो र ज:  तदेकत्र कृतं युक्त्या लेह  येतमधुद्र वम् चीरं चानु पिवे द्युक्त्यानिरन्नचीरसेविता श्रयो
8. रजीयमित्ये तल्ल्या तंसिद्धंरसायनम् संवत्सरप्रयोगेनशतंवर्षा णि जीवति मासद्द येनमनुजी जीवेतशरदांशतम् निहन्याच्छ्वयथुंचोग्रंवृद्धमिन्द्राश्र
9. निर्यथा पाण्डुरो  ग  मथार्शांसिमन्दमग्निंक्रिमीनपिभगन्द लांकामलांचकुष्ठाणिज ठराणिच प्लिहं गुल्मानप स्मारं शूलानिपरिकर्त्तिकाम्
10. य  क्ष्मिन्यक्षिन्विकारेतुयुज्य  तेयमयोरजी तांस्तान्विहंतिवैसद्यो देवारीन्कुलिशोयथा अनु प्रयोगोलाजानांस क्तवोमधुसंयुताः

# The Bower Manuscript.

Part II. Leaf 2.

Plate VII.

Obverse.



Reverse.



Photo-etching.

ORIGINAL SIZE.

Survey of India Offices, Calcutta, January 1893.

## THE BOWER MANUSCRIPT.

**Part I.—Leaf 3.** *Plate VIII.*

*Obverse.*

1. ◻रानुपनालेह्याः स्युःसप्ताष्टौदिवसानितु ॥ ◎ अयोरजोयन्नामचूर्णम् ◎ मुस्तैलाचन्दनोशरयवानीव्योषवल्कौ फलंत्रिकटुकादारुदार्व्वीत्वक्पण्टत्वचःपटोलनिम्ब
2. यक्षन्याभूर्व्वाभूनिम्ब शिग्रुकाःचूर्णा स्नायन्तिसौरा इस्सूक्ष्माप्रतिविषाःसमाः तिक्तकोनामहृद्रुल्मशूलह्रासान्निपातनुदिति ◎ तिक्तकंनामचूर्णम् ◎ पिप्पल्यति
3. वि षाहिंगुनागरेन्द्रयवावचा पाठाजमोदाक टुका ह यसौवर्च लाभयाःद्वयद्वादशकंचूर्णमजी र्णानाहशूलनुदिति ◎ द्वयद्वादशकंनामचूर्णम् ◎
4. मागध्या कुडवःस्यान्मरिचा दपिचकुडवस्तथा देयः नागरपलानिषट्ठः पंचचतात्रीसपत्रस्य सूक्ष्मेलायाःकर्षोगुडस्यदद्याद्विषत्रथार्द्धतुलाम् एतच्चूर्णंकृत्वा
5. गुडिकाःपलसंमिताःकुर्यात् कासंश्लेष्मो◻ कंभक्तस्यारोचकंविषममग्निम् शमयत्यजीर्णमेवच गुडिकासिद्धार्थिकानाम ◎ सिद्धार्थिकागुडिका ◎ सूक्ष्मेला
6. त्वचनागपुष्पमरिचंस्यात्पिप्पली नागरम् एलाभागविवर्द्धितैः समधृतैश्चूर्णैः समाशर्करा एतच्चूर्णमजीर्णगुल्मजठरेष्वर्शःस्सु हृद्रोगिणाम् हिक्का
7. श्वासिषुपार्श्वशूलिषुहितंकण्ठेविकाराश्रये ◎ वर्द्धमानकंनामचूर्णम् ◎ सूक्ष्मे लासुरसं हिंगू तिन्तिडीकाम्लवेतसे एलांतामलकींजीवांषडींपुष्क
8. रमेवच भिषक्पुष्करमूलञ्चकासश्वासिषुयोजयेत् हिक्कासु पार्श्वशूलिषुवातेचकफसंवृ ते ◎ सूक्ष्मेलावर्द्धमानकं ◎ श्लो॥ सौवर्चलाम्लवेतसपिप्पल्योनागरंवचां
9. हिङ्गुम् हृज्जठरशूलनाशनमौषधमुष्णाम्बुनापेयम् ◎ सौवर्चलाद्यचूर्णम् ◎ कुटजयवपिप्पलीनां द्वेकर्षेमधुरसायसार्द्धप लम् पाठापलञ्चदद्यात्
10. द्वेचपलेश्रृंङ्गवेरस्यसौवर्चलस्यकर्षंकर्षंक्षारस्ययावशूकस्य ~

*Reverse.*

1. ◻◻स्तथार्द्धंकर्षंतच्चूर्णंकारयेत्सूक्ष्मम् अस्यतुमार्ज्जारपदंपिबेन्नरःसर्प्पिषायवाग्वावा मद्यं वा शीलयतामद्येनालोड्यपातव्यम् एतन्निहंत्यजीर्णं श्ली◻
2. मेहञ्चपाण्डुरोगञ्च सभगन्दराण्यर्शांसिचपीत्वारिष्टंप्रयोगेन ॥ ◎ चूर्णारिष्टंनाम ◎ हिंगुभागोभवेदेकोवचायाद्विगुणोभवेत् विडंत्रिगुणितन्दद्याच्छृंगवेरंचतु
3. र्गुणम् यवानिकापञ्चगुणाषड्गुणाचाभयाभवेत् चित्रकःसप्तगुणितःसूक्ष्मचूर्णानिकारयेत् एतच्चूर्णकृतंसूक्ष्मंपाययीतप्रसन्नया मद्येनवातथान्येनदद्यादुष्णो
4. दकेनवा गुल्मघ्नंदीपनीयञ्च अर्शोघ्नंशूलनाशनम् कासश्वासहरञ्चैवचूर्णमानाहनाशनम् आत्रेयविहितंमुख्यंनाम्नाशार्दूलमुच्यते ⊙ शार्दूलंचूर्णंश्लो॥⊙॥
5. ३ सौवर्चलस्यचपलंद्विगुणंचाम्लवेतसम् चतुर्गुणमजाजीनांमरिचञ्चाष्टमंभवेत् मातुलुंगरसेनैतद्गुडिकांकारयेद्भिषक् प्रशान्तमग्निञ्जनयेद्वातशू
6. लञ्चनाशयेत् ◎ आश्विनीमातुलुंगगुडिका ◎ स्यान्मातुलुं गस्यरसंसमग्रत्रीण्यूषणान्यम्लवेतस ञ्चविडंयवानीं लवणोत्तमाख्यंसौवर्चलंस्या
7. द्गुडिकायकार्याः अर्शांसिताःसंशमयन्ति पी ताः शूलानिहन्युर्हृदिपार्श्वयोश्च आनाहयोगानपिचातिसारमरोचकंवातकृतञ्च गुल्मम् ◎ आम्लिकामातुलुंगगु
8. डिका ◎ ॥ स्याच्चित्रकंत्रिकटुकंसहपुष्करेणहि ङ्ग्वम्लवेतसयुतांसविडाक्षगन्धाम् कुस्तुम्बुरूणिवच यासहदाडिमञ्चसौवर्चलंयवम यंतुनवञ्च
9. क्षारम् दद्यात्तुलाधृतसमांशनवांयवानीम् कृष्णाज गन्धपिशुनामरजामजाजीम् तद्भास्करांशुपरिशु ष्कसमाहितांशंचूर्णंभिषक्समरसंतनुयोजयीत
10. तद्बीजपूरकरसैर्व्विचितंप्रपिष्य कुर्याद्विमृद्यगुडि कावदरप्रमाणाः एकामरिष्टमधुमाधवशार्करेण काल्यंपिबेत्सुरया

MINISTRY OF CULTURE · GOVERNMENT OF INDIA



# The Bower Manuscript.

CSL



## Obverse.



## Reverse.



ORIGINAL SIZE.

Photo-etching.

Survey of India Offices, Calcutta, February, 1893.

# THE BOWER MANUSCRIPT.

## Part II.—Leaf 4.

*Plate IX.*

*Obverse.*

1. दधिमस्तुनावा कासंश्वासंपाण्डुरोगञ्चिरसंप्लीहञ्चोग्रंशूलमानाहमुग्रम् हिक्कांहृद्रोगंजाड्यतां ष्ठीवनत्वमामा   तिसारञ्चसशूलगुल्मम्विषूचिकामलसकमग्निमाद्यंवम्
2. प्रवाहिकांगुदपरितापमर्शसाम् श्र   मेन्तितादिधिवदिहोत्तमंतम: प्रयोजिताह्यपिखलु घर्मवारिणा   ◎ आश्विनीमातुलुंगगुडिका श्लो १ ◎ पाठाकलिंगयव
3. मुस्तकरोहिणीनांभागा:सहातिविषयाधरणानिकुर्यात् कुर्याचतुर्थंधरणेनसमांहरिद्रां मूत्रेणगो:   सहपिवेदयचूर्णमेतत् कुष्ठाणिषड्वि   □□□□□
4. निहंतिदेहे स्थानानिनाशयतिसप्तमहाचयस्य गुल्मांश्चनाशयतिमासकृत:प्रयोग: सर्व्वाश्विकस्य   घृतमांसपरस्यजंतोरिति ◎ गुल्मचूर्णमाश्विनम् ◎
5. पिप्पलीसविडक्षारास्तथैवचस्तुवर्चिका शृंगवेरंसमरिचंसैन्धवंलवणंतथा यवानीमथदन्तीञ्च   वृहतावत्सकंतथा सौवर्चलमजाजींचत्रिफलाञ्चाचदा
6. पयेत् समभागानिसर्व्वाणिसूक्ष्मचूर्णानिकार   येत् चूर्णयोगो ह्ययंश्रेष्ठोगोमूत्रेणसुभावित: एतत्स्निग्धशरीरस्य   स्निग्धाहारस्यदेहिन:
7. विडालपदमात्रंतुदद्यादुष्णेनवारिणा परिजी   र्णे ततस्तस्मिन्यदातुतृ   षितोभवेत् घृतगन्धामवञ्चारीन्दाडिमस्यरसेनवै पाययीत भिषक्छ्रेष्ठस्तदासंप
8. द्यतेसुखी तस्यांतुपरिजीर्णायामाहारार्थीयदाभवेत् तदालोहितशालीनांसुखिन्नंमृदुचोदनम्भोजयेज्जांगलरसैर्व्यक्ताम्ललवणीकृतै:विषूचिकाया अर्शस्सुविकारा
9. विविधाश्च ये दुर्भुक्ते चाप्यजीर्णेच तथा पाण्ड्वामयेषु च   वातगुल्मेषु च तथा ग्रहणीदोषिणश्च ये एतद्योगं प्रयुञ्जान:   सुखमाप्नोति मानव:◎ मागधंचूर्णम्◎
10. उभेहरिद्रेमरिचंपद्मकुष्ठंसपिप्पली कर्प्पासमूलंमांसीचस्वर्ज्जीक्षारमथाष्टमम् एतानिसमभागानि द्वयदार्यां प्रपीषयेत् कोलास्थिमात्रांगु□□□□□यां
11. ~ परिशोषयेत् ततस्तु गुडिकामे   कांदद्या   दुष्णेन वारिणा ~

*Reverse.*

1. □□□□□□□तेरोगजातानिताञ्छृणु अजीर्णकमुदावर्त्तंमूत्रकृच्छ्रंगलग्रहम् आनाहंवातगुल्मञ्चयच्चलूताविषंभवेत् सर्व्वंदूषीविषहत□□□वृश्चकदष्टकम्
2. मूढवातमपस्मारंशाखव्यंशाख्यपुमांश्च: भूतग्रहमथोन्मादंमूढगर्भाश्चयास्त्रिय:दंष्ट्रामूलविषार्थेषुपानमालेपनंतथा◎हरिद्राचूर्णमाश्विनं श्लो ५ ◎षडीवचा
3. तामलकीपिप्पलीविश्व   भेषजम्गुडंघृतेनभर्ज्जित्वाकारयेद्गुडिकांभिषक् उरो   घातंप्रतिश्यायंपार्श्वंहृत्कुक्षिवेदनाम् शुष्ककासञ्चबलवत्सर्व्वमेतेनसाधयेदिति◎
4. गुडिकागौडिका श्लो २ ◎द्वेमरिचशतेकार्ये मागध्यापिप्पलीशतञ्चैकम् पलमपिचशर्करया:स्यान्नागरक स्तथासुख्य:स्यात्तिन्तिडीककर्षो दाडिमकर्ष:शुचिर्व्वदरकर्ष:
5. ५ देयोवरांगकर्षस्तथार्द्धकर्षश्चजाजीनाम् अम्ला   तकस्यकर्ष:कर्षार्द्धन्धान्यकस्यविचितस्य सौवर्चलक र्षयुतश्चूर्णारिष्ट:परमसिद्ध: एषसमूलानर्शांच्छ
6. मयेद्ग्रहणीञ्चदीपयतिशा   न्ताम् हृद्रोग   पाण्डुरोगैनिहंतिकासंसहश्वासमिति◎चूर्णारिष्ट:~नावनीतके   चूर्ण   योगास्समाप्ता:◎॥
7. प्रथमोध्यायस्समाप्त: ◎ इदमसृतरसप्र   कष्टंरसायनंबलविवर्द्धनंनृणाम् अमृतप्रा   शंनामाम्नासर्प्पिरुदारंप्रवक्ष्यामि~आमलकरसप्रस्थ:
8. चीरवि   दार्यास्तथाभवेत्प्रस्थ:प्रस्थश्चेक्षुरसस्यहि   स्तष्टीचीरस्यतद्वच्च प्रस्थंप्रस्थंसुधृतंघृत   स्यदद्याच्चशारदस्याच्च श्रौष ध्य   श्चसुपिष्टा:
9. इमा:प्रदेया:प्रमाणेन   ऋषभक   मृद्वीमधुकंविदारिगन्धांतथापय   स्या   श्च सह   दे   वां सानन्तांमधूलिकां •• विश्वदेवाञ्च द्वेमेदेर्थ्यप्रोक्तां
10. शतावरींमुद्गमाषपर्ण्यौच श्वावख्यथात्मगुप्तांवीराञ्चपलार्द्धिकान्भागान् मृद्वीकांकर्जूरंवदराख्यपिक्कु   डवसंमितांकुर्यात् अचोडतिन्दुकानांनिकोचकानाञ्च
11. □गा□म् ◎

# The Bower Manuscript.

Part II. Leaf 4. Plate IX.

Obverse.



Reverse.



ORIGINAL SIZE.

Photo-etching.

Survey of India Offices, Calcutta, February, 1893.

# THE BOWER MANUSCRIPT.

Part II.—Leaf 5. *Plate X.*

*Obverse.*

1. एतत्सर्द्ध्वात्वा परिपूतंस्थापयेच्छुभेभाण्ड शीतीभूतेदद्यान्मधुन:प्रस्थमुपूतस्य षोडशपलानिदद्याद्घृतानिसितशर्कराचूर्णस्य मरचाधपलन्दद्यात्पलञ्चसूक्ष्मेल▭
2. देयम् सूक्ष्मैरेतैश्चूर्णैरवचूर्ण्य खजेनमन्थयेत्प्राज्ञ: तस्यतुमात्रांमतिमानग्निबलंप्रेक्ष्ययुंजीत जीर्णेचजाङ्गलरसैर्भिषजाशाल्योदनंप्रदातव्यम् अ मृत
3. प्राश्यंसुख्यंबलवर्णविवर्द्धनंपुंसाम् क्षीणक्षतेप्रयोज्यंवृद्धेष्वथकर्शितेषुबालेषु ताम्यत्सु तथाश्वसतांप्रयोज्य मेतच्चहिक्कायाम् अमृतंनामविख्यातंसर्पिरात्रेय
4. निर्मितमिति ◎ अमृतप्राशंनामघृतम् श्लो ७ पा ◎ प्रियङ्गुंतगरंकुष्ठंदाडिमंसैलवालुकम् तालीसमेदा त्रिफलांकेसरंबृह तीद्वयम् नीलोत्पलं देवदा
5. रुंचन्दनंद्वेचशारिवे द्वेहरिद्रेविडङ्गाचसुमना कुसुमानिच दन्तीमंशुमतीञ्चैवमांजिष्ठासालपर्ण्यपि अक्षमात्रैर्घृतप्रस्थंपचेत्तोयेचतुर्गुणे एतत्कल्या
6. णकन्नाम पानीयेस र्पिषांवरम् कासंश्वासं प्रतिश्यायं तृतीयकचतुर्थकौ उन्मादञ्चतवैस र्पंप्र मेहान्वातशोणितम् हिक्कांछर्दिंपाण्डुरोगंश्वयथून्
7. मूत्रनिग्रहम् रेतोदोषाश्चयेपुंसांयोनीदोषां श्चयोषिताम् बन्ध्याचलभते गर्भंगरानपिचशातयेत् चूर्णयोगाधिकारेषुविषसन्दूषितेषु च क्लीहेष्वर्शस्सु
8. गुल्मेषुघृतमेतद्यथामृतम् बलवर्णकरञ्चैवदीपनीयंप्र चारकम् अलक्ष्मीमपिनिर्हन्यात्तिष्ठत्येतद्घृतंगृहे ◎ घृतंक ल्याणकंनाम श्लो ५ ◎
9. जीवकर्षभकौवीराकाकनासामृणाल्यपि मुद्गपर्णीं माषपर्णीमृद्धिंमेदाञ्चसंहरेत् महासहांक्षुद्रसहांतथा काकोडिमेवच अभीरुपर्णीं हंसपदीं षडीम्
10. ▭▭फलानिच फलंखर्जूरमृद्वीकामाम्रमामलकानिच पिप्पलीं शृङ्गवेरञ्चतथैवगुडशर्कराम् एतेषां गर्भंमादद्यात्क्षीरञ्चसहसर्पिषा ~

*Reverse.*

1. ▭▭▭▭▭▭▭पवेद्याधिविनाशनम्
2. एतज्ञातञ्चपित्तञ्चक्षतका संचनाशयेत् महाकल्याणकंसर्पिर्बहुरोगविनाशनम् सिद्धमात्रेयनिर्दिष्टमगस्त्यायमहात्मनेति ◎
3. महाकल्याणकंघृतंश्लोॅ१पा ~ ◎ निम्बंपटोलंदार्व्वीन्दुरालभांतिक्तरोहिणीन्त्रिफलाम् कुर्यादर्द्धपलांशांपर्पटकंत्रायमाणांच सलिलाढकसिद्धानांरसेष्टभागाव
4. शेषितेदद्यात् चन्दनकिराततिक्तकपिप्पल्यस्त्रायमाणाञ्च मुस्तावत्सकवीजंकल्कीकृत्वार्द्धकार्षिकान्भागान् नव सर्पिषश्चषट्पलमेतत्सिद्धंघृतंपेयम् कुष्ठज्वरगुल्मार्शो
5. ग्रहणीपाण्ड्वामयश्वयथुहन्तृ वैसर्प्यकिटिभ▭ामाकण्डूपदगण्डनुत्सिद्धमिति◎तिक्तकंघृतम् श्लो ५ ⊙ सप्तच्छदंप्रतिविषांशम्याकंतिक्तरोहिणीम् पाठांमुस्तोशीरं
6.८ त्रिफलांप टोलपिचुमुन्दपर्पटकौ धन्व यवाषकचन्दनमुपकुल्यांपद्मकंद्विरजनीञ्च षड्ग्रन्थांसविशालांशतावरींशारिवेचोभेवत्सकवीजंवाशांमूर्व्वाम
7. मृतांकिराततिक्तञ्चकल्कंकुर्यान्मतिमान्यष्टिह्वाम् त्रायमाणाञ्चकल्कस्यचतुर्भागंजलमष्टगुणं रसो मृतफलानाम् द्विगुणोघृतात्प्रदेयस्तत्सर्पि:पाय
8. येत्सिद्धम् कुष्ठानिवातपित्तप्रबलान्यर्शांसिरक्तवाहीनि वैसर्परक्तपित्तंवातासृक्पाण्डुरोगञ्चविस्फोटकान्सपामा मुन्मादंकामलांक्रिमिंकण्डूम् हृद्रोगगण्डपिडकानस
9. ृग्जो गण्डमालांच हन्यादेतत्सद्य: पीतंकालेयथाबलंसर्पि: योगशतैरप्यजितं महाधिकारान्महासर्पि: ◎महातिक्तकं श्लोगु ◎ उ भेहरिद्रेमा ञ्जिष्ठापाठाक
10. टुकरोहिणी • चित्रको • थ विडंगाचपिप्पली तृवृतावचा शारिवाकुष्ठसुस्तैलामधुकंचाक्षसंमिता: दापयेच्छंखपुष्पीञ्चगव्यप्रस्थेषुपञ्चसु सिद्धमेतद्घृतं
11. पीत्वाबलवा न्सप्रादनामय:प्रसन्नवर्णोमेधावीद्युतिमान्स्त्रीषुचाक्षय:ऐतेनवाग्विशुध्यतिब्रह्माधीतंननश्यतिचभूय:स्वरवर्णयोश्वजननंगर्भंचाधत्तेबन्ध्यानाम्पंचगव्यं▭

# The Bower Manuscript.



## Obverse.



## Reverse.



ORIGINAL SIZE.

Photo-etching

Survey of India Offices, Calcutta, February, 1893.

## THE BOWER MANUSCRIPT.

**Part II.—Leaf 6.** *Plate XI.*

*Obverse.*

1. विडगाचित्रकादतव्योषवरिणपि □ल अश्वमूत्रीत्रिवृत्क्षीरन लीकासैन्धव वचाम् घृतप्रस्थंपचेदेभिर्द्धातुद्विगुणीकृतम् त□
2. त्पाययेद्युक्त्याश्वासार्शोगुल्मनाशनम् ॥ पिप्पलीपिप्पलीमूलचव्यचित्रकनागरैः पलिकैः सयवक्षारैर्घृतप्रस्थंविपाचयेत् क्षीरप्रस्थेनतत्सर्पि
3. र्हन्तिगुल्मं कफात्मकम् ग्रहणीपाण्डुरोगघ्नंप्लीहकासज्वरापहम् ◎ षट्पलंनाम घृतम् ◎ श्लो ५ ॥ चूर्णंचि फला
4. मुस्ताविडंगाचव्यचित्रकैः कल्कैरेतैर्घृतं सिद्धंसक्षीरंवातगुल्मनुत् ◎ चूर्णं ◎ दृष्टसशावसंकु व्य पचेदष्टगुणेजलेशिष्टे ष्टभागेतस्मैवपुष्पकल्कंच
5. दापयेत् तेनसिद्धंघृतं क्षौद्रसंयुक्तंपित्तगुल्मनुत् रक्तपित्तज्वरश्वासकासहृद्रोगनाशनम् ◎ वाशा घृतम् श्लो ८ ◎ नागरंपिप्पलीमूलंचित्रकोहस्तिपिप्पली
6. श्वदंष्ट्रापिप्पलीधान्यंबिल्वंपाठांयवानिकाम्चांगे रीस्वरसे सर्पिरेतैःकल्कैर्विपाचयेत् चतुर्गुणेनदध्नाचतद्घृतं कफवा तनुत् अर्शांसिग्रहणी
7. दोषंमूत्रकृच्छ्रंप्रवाहिकाम् गुदभ्रंशार्त्तिमानाहं घृतमेतद्व्यपोहति ◎ चांगेरीघृतम् ◎ श्लो ७ ॥ चतुर्गुणंरसंकृत्वाचाङ्गेर्याःसु परिस्रुतम्तस्मै
8. वकल्केनालोड्यविल्वमात्रेणबुद्धिमान् घृतप्रस्थं□□देतच्छनैर्मृद्वग्नि नाभिषक् अर्शोव्याधिर्भवेद्यस्यपीत्वैवसुखीभवेत्◎चांगेरीघृतमपरम्◎श्लो८॥निदिग्धिकायाः
9. स्वरसंग्राहयेद्यन्त्रपीडितम् चतुर्गुणेरसेतस्मिन्घृतप्रस्थंविपाचयेत् गर्भेदद्याच्चिकटकंरास्नांगोक्षुरकंबलाम् पंचकासानिदंसर्पिःपीतंसद्योव्यपोहति ◎ कण्टकारिका
10. घृतंनाम श्लो ८ ◎ मधुकस्यपलान्यष्टौद्राक्षायाः प्रस्थमेवच सारसेतुजलद्रोणेशनैर्मृद्वग्निनापचेत् अष्टभागावशेषेतुघृतप्रस्थंविपाचयेत् तस्मिन्सिद्धेचपूतेच
11. ~ शीतीभूतेचदापयेत् शर्करायाःपलान्यष्टौप्रस्थार्द्धं माक्षिकस्यच एतच्छोणितपित्तीनांकासिनामल्परेतसाम्

*Reverse.*

1. □□नाचक्षतानांचप्रयोज्यंसमसतुकम् ◎ मृद्वीकाघृतं श्लो ११ पा ~ ◎ पंचमूलमथोक्ष्वंगुलूचंमधुकंबलाम् पलिकानिजलद्रोणेचतुभगावशे□□तत्कषा□□□
2. □घ्नघृतप्रस्थंविपाचयेत् गर्भंचजीवनीयानांदद्यात्क्षीरंचतुर्गुणम् विदार्यामलकानांचतथैवेक्षुरसस्यचदत्वाघृतसमान्भागान्पचेतमृदुनाग्निना रासायनिकमित्येतत्प्रेयंस
3. र्पिःक्षयावहम्हृद्रोगक्षतकासानांज्वरानांचविनाशनमिति◎रसायनिकंनामघृतंश्लो५◎शरमूलेक्षुमूलानिकाण्डेक्षूनिक्षुवालिकाम्शतावरींपयस्यांचविदारीङ्कण्टकारिकाम्
4. जीवन्तींजीवकंमेदांवीराम्ऋषभकंबलाम् ऋद्धिंगोक्षुरकंरास्नामात्मगुप्तांपुनर्नवाम् एषां त्रिपलिकाभागामाषाणामाढकन्नवम् जलद्रोणेविपक्तव्यमाढकञ्चाव शेषयेत्
5. ५ तत्रपेष्याणिमधुकं द्राक्षाफल्गूनिपिप्पलीम् आत्मगु□□□□निकर्जूराणिशतावरीम् विदार्यामलकेक्षूणांरसाःस्युस्त्रप्रथक्प्रथक् सर्पिषश्चाढकंदद्यात्क्षीरद्रोणंचतद्भिषक्
6. साधयेद्घृतशेषञ्चसुपू तंयोजयेत्पुनः शर्करायास्तुकाक्षीर्याश्चूर्णैःप्रस्थोन्मितैः पृथक् पलिकागुडिकाः कार्यास्तायथाग्निं प्र यो जयेत्
7. एष वृष्यः परंयोगो बृंहणोबलवर्द्धनः अनेनाश्वइवोदीर्णोलिंगमर्प्पयतेबली ◎ शरमूलीयंनामघृतम् श्लो गु पा ~ ◎ मायूरं वेशवारंतु
8. कुर्य्य तोयार्पणेपचेत् रास्नायादशमूलेनबलायामधुकेनच चतुर्भागावशेषेणघृतप्रस्थंविपा चयेत् चतुर्गुणेनपयसाजीवनीयैश्चपेषकैः ~
9. मायूरमेतच्छंसन्तिनास्येपानेचमूर्द्धनि नाशनंशीर्षरोगाणामार्द्दितस्यार्व्वुद स्यच कर्णशूला निवाधिर्यंमन्यास्तंभंहनुग्रहम् पूत्यास्यां कर्णं
10. नादत्वंतालुशोषोपजिह्विकाम् राज्यन्ध्यंपिंगलाक्षत्व तिमिरंजलकाचताम् अभि ष्यन्दमधी मन्थंनेत्रयोश्चापकर्षतीति ◎ मायूरंघृतं श्लो गु पा◎

Ministry of Culture · Government of India

# The Bower Manuscript.

CSL



## Obverse.



## Reverse.



ORIGINAL SIZE

24

Photo-etching

Survey of India Offices, Calcutta, February 1893.

# THE BOWER MANUSCRIPT.

Part II.—Leaf 7. **_Plate XII._**

*Obverse.*

1. ▭त्र्यूषणस्त्रिफलंसपाठांसचव्यकंस्यादथदेवदारु रास्नाषडीन्त्वामलकीविदारीत्रिदिग्धिकांगोक्षुरकंस्थिरांच स्यादात्मगुप्तामथशारिवाञ्चमेदाञ्चदद्यात्रिशतावरीञ्च
2. ए तानिसर्व्वाणिसमानिकृत्वाघृतंपचेत्क्षीरचतुर्गुणेन कासज्वराशींसिशिरोभितापंतथैवभक्ता नभिनन्दनञ्चहृद्रोगवातछिलवातगुल्मे प्लीहे च ची
3. र्णचतयोश्च दद्यात् अर्शांसिसिकृच्छ्रान्युभितंच वातंनिहंति सर्व्वांन्विधिवत्प्रयुक्त इति ◎ महात्र्यूषणनामघृतं ८ पा ॰ ◎ मुद्गपर्णीमाषपर्णीमृद्धिंमेदाञ्चरुहूरेत्
4. महासहांक्षुद्र सहांतथाकाकोलिमिव च अभीतपर्णी हंसपदीं षडीं कर्कुफलानि च फल्गुकर्जूर मृद्वीकामाम्रमामलकानिचबिल्वाग्निमन्थस्योनाकंकार्षयं
5. पाटलांब लाम् पर्णंश्चतम्र पिप्पल्य: श्वदंष्ट्रां बृहतीद्वयम् शृंगींतामलकीं द्रा क्षांजीवन्तींपु ष्कारागुरुम् अभयामनृतामृद्धिम्
6. जीवकर्षभकौषडीम् मुस्तां पुनर्न्नवां मेदा मेलांचन्दनमुत्पलम्विदारींवृषमूलानि काकोलींकाकनासिकाम् एषांपलोन्मितान्भागाञ्छता
7. न्यामलकस्यच पञ्चदद्यात्तदैकध्यंजलद्रोणे विपाचयेत् ज्ञात्वागतरसा नेतानौषधानथतद्रस: तदामलकमुद्धृत्य निष्कुलं
8. तैलसर्पिषो: पलद्वादशकेभ्य द्वादेयामत्स्यण्डिकापला: पञ्चाशत्परिपूताया लेहवत्साधु साधयेत् षट्पलंमधुनश्चा च
9. सिद्धशीतेप्र दापयेत्चतुष्प लंतुकाची र्या:पिप्पल्या द्वि पलंत था पलमेकंविदध्याच्चलगेलापच केसरान् इत्ययंच्यवनप्राश:परमुक्तंरसाय
10. नम् कासश्वासहरश्चैवविशेषेणोपदिश्यते क्षीणक्षतानांवृद्धानांवालानांचाङ्गवर्द्धनम् स्वरक्षयमुरोरोगंहृद्रोगंवातशोणितम्
11. पिपासांमूत्रशुक्रस्थान्दोषाश्चाप्यपकर्षति अस्यमात्रांप्रयुंजीतयोपरुन्ध्यान्नभोजनम् ॰

*Reverse.*

1. ▭स्यप्रयोगाच्च्यवन:सुवृद्धो भूत्पुनर्युवा मेधांस्मृतिंकान्तिमनामयत्वमायुष्प्रकर्षबलमन्द्रियाणम् स्त्रीषुप्रकर्षं • • मग्निवृद्धिम्
2. वर्णंप्रसादं पवनानुलोम्यम् रसायनस्यास्य नर:प्रयोगाल्लभेतजीर्णोपिकुटिप्रवे शात् जराकृतंरूपमथास्यपूर्व्वम् बिभर्त्तिरूपनवयौवनानामिति ◎
3. च्यवनप्राशंघृतंस्रो ५२ ६ ◎ हरीतकींत्रिकटुकंवचांकटुकरोहि णीम् सौवर्च्चलंयवक्षारोविडंगाचित्रकंतथा श्र ष्मप्रमाणैरेतैस्तुघृतप्रस्थंविपा
4. गु चयेत् तस्मि न्नं स्रावयित्वाथपाययीतयथाबलम् वातगु ल्मंप्लिहंकासंस हिक्कां सक्रिमीनपि दशांगोनाशय त्येताद्योगान्व
5. ञ्छद्वासुरानिति ◎ दशांगनामघृतंस्रो ३ ◎ चित्रकंत्रिफलांचैववृहतींक ण्टकारिकाम् सुहाचीरंविडङ्गानिघृतंनवमसु
6. क्ते एकैकस्यतुकर्षेण घृतस्यकुडवंपचेत् चतुर्गुणेनतोयेनपाचयेन्मृदुनाग्निना अन्नकाले पिबेन्मात्रामर्द्धकर्षसमन्विताम् उष्णोदकञ्चा
7. नुपिबेदल्पत्वात्त स्यसर्पिष:विरिक्तं तुयवागूंस्यात्सर्पिषापरिमर्द्दिताम् रसैनजाङ्गलानांवाभोजनन्दापयेद्भिषक् वातगुल्ममुदावर्त्तंवल्मी
8. मर्श:स्त्रिहन्तथा ग्रहणीन्दीपयेन्मन्दांकुष्ठदोषांश्चनाशयेत् नाराचकमितिख्यातंसर्पिर्न्नाराचसन्निभम् भिषजासन्नियोक्तव्यं नाराचमिवशत्रवेइति ◎
9. नाराचकन्नामघृतंस्रो ५४ ◎ मूलकानांपुराणानांपलान्यष्टौसमानयेत् तानिस्थाल्याञ्जलद्रोणेश्रनैर्मृद्वग्निनापचेत् विल्वमात्रप्रमाणेनपिष्ट्वाचैनं
10. निधापयेत् पञ्चदाडिमसाराणांपलान्यत्रप्रपीषयेत् पिप्पलीश्रृंगवेराभ्यांदद्यादद्वपलंपलम् पलं चित्रकमूलस्यसुपिष्टस्याचदापयेत्
11. घृतस्यचपलान्यष्टौनवस्याचप्रदापयेत् दध्नश्चात्रसुजातस्यसमा मात्राविधीयतेएतत्सर्व्वंसमानी य

CSL

# The Bower Manuscript.

Part II. Leaf 7.

Plate XII.

Obverse.



Reverse.



ORIGINAL SIZE.

Photo-etching.

Survey of India Offices, Calcutta, February 1893.

26

CSL

# THE BOWER MANUSCRIPT.

## Part II.—Leaf 8.

**Plate XIII.**

*Obverse.*

1. शनैर्मृदग्निनापचेत् सुसिद्धंचैनमाज्ञायपरिपूतंनिधापयेत् येकेचिद्याधय:कायि कफानिलसमुद्भवा: तेषां प्रायोगिकंश्रेष्ठंघृतमेतद्विधीयते ◎
2. मूलकघृतंनामश्लो [illegible] ◎ लशुनस्यशतंविद्वाञ्जलद्रोणेविपाचयेत् चतुर्भागावशेषञ्चकषायम वतारयेत् तेनवैद्य:कषायेनविण्चेतघृता
3. ढकम् काल्क पेष्याणिचैतानिसिद्ध्यमानेप्रदापयेत् कर्षञ्चित्रकमूलस्यपिप्पलीकर्षमेवच चव्यायाश्चभवे त्कर्ष:शृङ्गवेरपलंतथालवणानां
4. चपञ्चानां पला र्द्धञ्चाम्लवेतसात् तथारामठकस्यापिद्विगुनोचपलंभवेत् तत्सिद्धंनिसु तंसम्यक्सुगुप्तं तन्निधापयेत् ततोमात्रांपिबेत्काले
5. शृणुमेयेघृत ह्वितम् वातष्ठीलासु ग्रध्रस्यांवातगुल्मेप्लिहोदरे वातश्लेष्मातिपा ण्डू नामर्शस्वथभगन्दरे एकांगरोगिणांदद्यात्
6. तथासर्व्वाङ्गरोगि णाम् लशुनाद्यंघृ तंह्येतदश्विभ्यांसंप्रकल्पितम् ◎ आश्विनंलशु नकंनामघृतंश्लो [illegible] ◎ घृतन्द
7. शगुणेतोयेसाधयेदाजलक्षयात् ततोद शगुणेतोयेसाध्यमाम लकन्तथा दश भागावशिष्टेस्मिन्घृतप्रस्थंविपाच
8. येत् ततोयथा बलंमात्रां पाययेज्ज्वरकाङ्क्षितम् सर्व्वज्वरहरंसर्प्पि रेत ब्रह्माभिपू जितम् दीर्घकालंप्रयुञ्जन्तुभवे
9. द्वल्यंरसायनम् ◎ ज्वरहरमाश्विनंनाम घृतम्श्लो [illegible] ◎ विं श दा म लका न्दद्या द्विंशति श्च हरीतकी: विभीतकानि विंशच्च त्रायमाण
10. पलंभवेत् तथैवतिक्तरोहिण्यागुलूच्याश्चपलश्भवेत् तोयार्द्धकंसेसिद्धन्तु च तु र्भा गावशेषितम् परार्ध्यंकुडवेनै तद्घृत
11. मण्ड मधि श्रयेत् तत्रकल्कीकृतानिस्युरावपेतनवानिह पिप्पलीनांपलार्द्धञ्चत्रिवृतार्धपलन्तथा

*Reverse.*

1. □□त्यकचतुर्थांशंदद्यात् स्यात्रि चुलानिच तत्सिद्धंनिसुतंपेयं पाण्डुकामलनाशनम् गुल्मवर्ध्मप्रमेहीनां
2. श्वयथौकुष्ठ रोगिणाम् शिश्नव्या ध्युदराणांचउदावर्तज्वरेषुच वैरोध्यानाञ्चव्याधीनांपथ्यंसिद्धोत्तरंघृतम्◎सिद्धोत्तरंनामघृतंश्लो [illegible] ◎
3. दन्तीचित्रकमूलानामष्टौकुर्व्वीतस ञ्चयाम् अभयाविङ्गतिं गुर्व्य: ष ड्ढ लंदेवदारु च नीवकादंबंवरणंराजवृक्षंपुनर्न्नवाम् चिरिविल्वत्वचञ्चैव
4. पृथक्कुद्दलिका:स्मृता: द्वेपञ्च मूलेसंहृत्यपृथ गाढक संमिते विपाचये दपान्द्रोणेसारस्मिन्मृदुनाग्निना चतुर्भागावशेषंतत्क
5. [illegible]षायमवतारयेत् घृताढकेप चेत्तस्मिन पेष्यां श्चेमान्प्रदाप येत् पिप्पली पिप्पलीमूलंचव्यञ्चमरिचानिच ~
6. लवणानाञ्चपञ्चाना मावपेदेककार्षिकान् एतद्धान्वन्तरंसर्प्पि: सर्वरोग निवर्हणनम् पञ्चगुल्मानभिव्यक्तानष्टौचोदरगृहय:
7. श्वयथुंशोषम र्शांसिप्रमेहांश्चैकविंशति द्वी पयेद्ग्रहणीमन्दां कुष्ठान्बहु विधा ञ्जयेत् अहीनांमूषिकानांचयच्चस्यात्कृत्रिमंविषम्
8. सर्व्वाहारेष्वनिय मी बृंहणोदेहमालन: एतद्धान्व न्तरं सर्पि:श्रेष्ठं ब्रह्मा भिपूजितम् यथावत्संप्रयुंजान: प्राप्नुयात्सिद्धिमुत्तमामिति◎धान्वन्तरंश्लो
9. [illegible] ◎ चन्द नंस्यादुशीरञ्चपद्मकंकुङ्कुमविन्दकम् त्रायमाणांसमांद द्यात्तथाचन्दनशारिवाम् तथाप्रतिविषांचैवतथातामलकीभवेत् चतुर्गुणेजलेवैद्योघृतप्रस्थं
10. विपाचयेत् तद्विपीतंप्रमेहीनांरक्तपित्तक्षयेषु च अर्शसांभिन्नवर्च्चानां पाण्डुरोगेचतद्धितम् प्रणुदे द्ब्रहणोदोषांस्त्वग्दोषांश्चशरीरिणाम् सर्प्पिरेतद्ध
11. वेत्पथ्यं विषघ्नममृतोपमम् ◎ विषहरन्नामघृतमाश्विनम् श्लो [illegible] ◎ चित्रकं त्रिवृतांचैव श्यामांचप लिकानि तु

# The Bower Manuscript.



## Obverse.



## Reverse.



ORIGINAL SIZE.

Photo-etching.

Survey of India Offices, Calcutta, February 1893.

CSL

23

# THE BOWER MANUSCRIPT.

## Part II.—Leaf 9. Plate XIV.

*Obverse.*

□□शद्धरीतक्योद्रोणांद्वेसलिलस्यच चतुर्भागावशेषन्तत्कषायमवतारयेत् ततस्तेनकषयणघृतप्रस्थविपाचये□नलकायाधकुडव त□□□□□□□□□□□□□□
□चीरंगर्भ्रदत्वाविपाचयेत् एतद्विन्दुघृतंनामनेकरोगविनाशनम् यावन्त:पिवतेविन्दूंस्तावद्वेगान्विरिच्यतेउदराणिप्लिहान्गुल्मान्कुष्ठाणिचगराणिच
□□गुल्मे चनारीणांगण्डमालाभग न्दरंपित्तार्गंस्पूर्ध्ववातेषुरोगायेसान्निपातिका:गदि तेगरदत्तेचमधुमेहेचशस्यते ◎ विन्दुघृतन्नाम ◎ श्लो ५ ॥सुधा
चीरपलेनेद्वेपलेसर्पिष:पचेत् कंपिल्यकपलंचैकंशाणार्वंसैन्धवस्यच तृघृतायाःपलञ्चैकंकुडवोमलकीरसात् तोयकंसे नविपचेच्छनैर्द्वंदग्निनाभिषक् एतद्विन्दु
घृतंनाम अश्विनोनुमतंशुभम् विन्दव:पिवतेयावत्ता□द्वेगान्विरिच्यते कर्षप्रमाणन्दातव्यंजठरीसोपगुल्मयो: तथाकच्छपरोगीणांयुञ्ज्यो□ मतिमान्भिषक् उष्णंवानुपिवे
त्तोयमल्पत्वात्तस्यसर्प्पिष: एषगुल्मान्सनिच यान्सशूलान्सपरिग्रहान् भिनत्त्येकप्रयोगेनवायुर्ज्जलधरानिव पञ्चगुल्मवधार्थंहिसर्पिरेतत्प्रवर्त्तितम्
सर्व्वासुरवधार्थायथावज्रंस्वयंभुवा एतद्वि न्दुघृतंप्रोक्तंसिद्धंसिद्धानुमानितमिति ◎ विन्दुघृत माश्विनम् श्लो ८ ◎ आजंपय: शृंगवेरंवचाशिग्रुर्हरीतकी
पिप्पल्योमरिचंपाठासैन्धवन्दशमंघृतम् शृंगवेरा□□ोभा गालवणांता: पलीनका: चतुर्गुणेनपयसाघृतप्रस्थंविपाचयेत् अस्योपयोगाद्विन्द्येतस्मृतिं मेधांच
मानव:जडगद्गदमूकत्वंपानादेवास्यशाम्यतीति ◎ सारस्वतंघृतंश्लो ३ द्वितीयोध्याय: ◎ बलातैलंप्रवक्ष्यामिवातरोग निबर्हणम् आत्रेयानुमतंसिद्धंवन्ध्यानांगर्भदंशुभम्
□□या:खलुमूलानांशुष्कंपलशतं □□□□□ा: पञ्चविंशद्वराश्चादशपलंभवेत् प्रचाल्यजर्जरी कृत्वापचेद्दिव्येनवारिणा जलाढकशतेसिद्धमा ढकंचावशे
□येत् कषायेण□□□□□□□□□□□□□ चयेत् दधिमस्तुचश्च न्नाज्वतथैवेचुरसोभवेत् अजचीराद्र्भागश्चशनैर्मृदु□िनापचेत्

*Reverse.*

□□□□□□□□□□□□न□ □□□□□□येत् बलातिबलयोर्मूलं सरलंदेवदारुच मुस्तंमधुकमंजिष्ठातगरंपद्मकागुरुम् हरे□□□□□
